# श्रीमद् भगवद् गीता

## Śrīmad Bha-ga-vad Gī-tā

## Chapter 2 Verses 37 - 53

| | |
|---|---|
| ॐ हरिः ॐ | om hariḥ om |
| श्री गुरुभ्यो नमः | śrī gu-ru-bhyo na-maḥ |
| हरिः ॐ | hariḥ om |
| ॐ श्री कृष्णपरमात्मने नमः | om śrī kṛṣ-ṇa-pa-ra-māt-ma-ne namaḥ |
| श्रीमद् भगवद् गीता | śrīmad bha-ga-vad gī-tā |
| अथ द्वितीयोऽध्यायः । | a-tha dvi-tī-yo'dhyā-yaḥ ǀ |
| साङ्ख्ययोगः । | sāṅ-khya-yo-gaḥ ǀ |

| | |
|---|---|
| हतो वा प्राप्स्यसि स्वर्गं | hato vā prāps-yasi svar-gaṁ |
| जित्वा वा भोक्ष्यसे महीम् । | jit-vā vā bhokṣ-yase ma-hīm ǀ |
| तस्मादुत्तिष्ठ कौन्तेय | tas-mād-ut-tiṣ-ṭha kaun-teya |
| युद्धाय कृतनिश्चयः ॥ २-३७ ॥ | yud-dhā-ya kṛ-ta-niś-ca-yaḥ ǀǀ 2-37ǀǀ |

| | |
|---|---|
| सुखदुःखे समे कृत्वा | su-kha-duḥ-khe sa-me kṛt-vā |
| लाभालाभौ जयाजयौ । | lā-bhā-lā-bhau jayā-ja-yau ǀ |
| ततो युद्धाय युज्यस्व | tato yud-dhā-ya yuj-yas-va |
| नैवं पापमवाप्स्यसि ॥ २-३८ ॥ | nai-vaṁ pā-pam-avāps-yasi ǀǀ 2-38ǀǀ |

एषा तेऽभिहिता साङ्ख्ये | eṣā te'-bhi-hi-tā sāṅkh-ye
बुद्धिर्योगे त्विमां शृणु । | bud-dhir-yoge tvi-māṁ śṛ-ṇu ।
बुद्ध्या युक्तो यया पार्थ | bud-dhyā yuk-to ya-yā pār-tha
कर्मबन्धं प्रहास्यसि ॥ २-३९ ॥ | karma-ban-dhaṁ pra-hās-yasi ।। 2-39।।

नेहाभिक्रमनाशोऽस्ति | nehā-bhi-kra-ma-nā-śo's-ti
प्रत्यवायो न विद्यते । | prat-ya-vā-yo na vid-yate ।
स्वल्पमप्यस्य धर्मस्य | sval-pam-ap-yas-ya dhar-mas-ya
त्रायते महतो भयात् ॥ २-४० ॥ | trā-ya-te ma-ha-to bha-yāt ।। 2-40।।

व्यवसायात्मिका बुद्धिः | vya-va-sā-yāt-mi-kā bud-dhiḥ
एकेह कुरुनन्दन । | eke-ha kuru-nan-dana ।
बहुशाखा ह्यनन्ताश्च | bahu-śākhā hya-nan-tāś-ca
बुद्धयोऽव्यवसायिनाम् ॥ २-४१ ॥ | bud-dha-yo'-vya-va-sā-yi-nām ।। 2-41।।

यामिमां पुष्पितां वाचं | yā-mi-māṁ puṣ-pi-tāṁ vā-caṁ
प्रवदन्त्यविपश्चितः । | pra-va-dant-ya-vi-paś-ci-taḥ ।
वेदवादरताः पार्थ | veda-vā-da-ra-tāḥ pār-tha
नान्यदस्तीति वादिनः ॥ २-४२ ॥ | nān-ya-das-tī-ti vā-di-naḥ ।। 2-42।।

कामात्मानः स्वर्गपराः | kā-māt-mā-naḥ svar-ga-pa-rāḥ
जन्मकर्मफलप्रदाम् । | jan-ma-kar-ma-pha-la-pra-dām ।
क्रियाविशेषबहुलां | kri-yā-vi-śe-ṣa-ba-hu-lāṁ
भोगैश्वर्यगतिं प्रति ॥ २-४३ ॥ | bho-gaiś-var-ya-ga-tiṁ prati ।। 2-43।।

| | |
|---|---|
| भोगैश्वर्यप्रसक्तानां | bho-gaiś-var-ya-pra-sak-tā-nāṁ |
| तयापहृतचेतसाम् । | ta-yā-pa-hṛ-ta-ce-ta-sām । |
| व्यवसायात्मिका बुद्धिः | vya-va-sā-yāt-mi-kā bud-dhiḥ |
| समाधौ न विधीयते ॥ २-४४ ॥ | sa-mā-dhau na vi-dhī-ya-te ।। 2-44।। |
| | |
| त्रैगुण्यविषया वेदाः | trai-guṇya-vi-ṣa-yā ve-dāḥ |
| निस्त्रैगुण्यो भवार्जुन । | nis-trai-guṇyo bha-vār-juna । |
| निर्द्वन्द्वो नित्यसत्त्वस्थः | nir-dvand-vo nit-ya-sat-tvas-thaḥ |
| निर्योगक्षेम आत्मवान् ॥ २-४५ ॥ | nir-yo-ga-kṣe-ma āt-ma-vān ।। 2-45।। |
| | |
| यावानर्थ उदपाने | yā-vā-nar-tha uda-pā-ne |
| सर्वतः संप्लुतोदके । | sar-va-taḥ sam-plu-to-da-ke । |
| तावान्सर्वेषु वेदेषु | tā-vān-sar-ve-ṣu ve-de-ṣu |
| ब्राह्मणस्य विजानतः ॥ २-४६ ॥ | brāh-ma-ṇas-ya vi-jā-na-taḥ ।। 2-46।। |
| | |
| कर्मण्येवाधिकारस्ते | kar-maṇ-ye-vā-dhi-kā-ras-te |
| मा फलेषु कदाचन । | mā pha-le-ṣu ka-dā-ca-na । |
| मा कर्मफलहेतुर्भूः | mā kar-ma-pha-la-he-tur-bhūḥ |
| मा ते सङ्गोऽस्त्वकर्मणि ॥ २-४७ ॥ | mā te saṅ-go'st-va-kar-ma-ṇi ।। 2-47।। |
| | |
| योगस्थः कुरु कर्माणि | yo-gas-thaḥ ku-ru kar-mā-ṇi |
| सङ्गं त्यक्त्वा धनञ्जय । | saṅ-gaṁ tyakt-vā dha-nañ-jaya । |
| सिद्ध्यसिद्ध्योः समो भूत्वा | sid-dhya-siddh-yoḥ sa-mo bhūt-vā |
| समत्वं योग उच्यते ॥ २-४८ ॥ | sa-mat-vaṁ yoga uc-ya-te ।। 2-48।। |

| | |
|---|---|
| दूरेण ह्यवरं कर्म | dū-re-ṇa hya-va-raṁ kar-ma |
| बुद्धियोगाद्धनञ्जय । | bud-dhi-yo-gād-dha-nañ-jaya \| |
| बुद्धौ शरणमन्विच्छ | bud-dhau śa-ra-ṇam-an-vic-cha |
| कृपणाः फलहेतवः ॥ २-४९ ॥ | kṛ-pa-ṇāḥ pha-la-he-ta-vaḥ \|\| 2-49\|\| |

| | |
|---|---|
| बुद्धियुक्तो जहातीह | bud-dhi-yuk-to ja-hā-tī-ha |
| उभे सुकृतदुष्कृते । | ubhe su-kṛ-ta-duṣ-kṛ-te \| |
| तस्माद्योगाय युज्यस्व | tas-mād-yo-gā-ya yuj-yas-va |
| योगः कर्मसु कौशलम् ॥ २-५० ॥ | yo-gaḥ kar-ma-su kau-śa-lam \|\| 2-50\|\| |

| | |
|---|---|
| कर्मजं बुद्धियुक्ता हि | kar-ma-jaṁ bud-dhi-yuk-tā hi |
| फलं त्यक्त्वा मनीषिणः । | pha-laṁ tyak-tvā ma-nī-ṣi-ṇaḥ \| |
| जन्मबन्धविनिर्मुक्ताः | jan-ma-ban-dha-vi-nir-muk-tāḥ |
| पदं गच्छन्त्यनामयम् ॥ २-५१ ॥ | pa-daṁ gac-chant-ya-nā-ma-yam \|\| 2-51\|\| |

| | |
|---|---|
| यदा ते मोहकलिलं | ya-dā te mo-ha-ka-li-laṁ |
| बुद्धिर्व्यतितरिष्यति । | bud-dhir-vya-ti-ta-riṣ-ya-ti \| |
| तदा गन्तासि निर्वेदं | ta-dā gan-tā-si nir-ve-daṁ |
| श्रोतव्यस्य श्रुतस्य च ॥ २-५२ ॥ | śro-tav-yas-ya śru-tas-ya ca \|\| 2-52\|\| |

| | |
|---|---|
| श्रुतिविप्रतिपन्ना ते | śru-ti-vi-pra-ti-pan-nā te |
| यदा स्थास्यति निश्चला । | ya-dā sthās-ya-ti niś-calā \| |
| समाधावचला बुद्धिः | sa-mā-dhā-va-ca-lā bud-dhiḥ |
| तदा योगमवाप्स्यसि ॥ २-५३ ॥ | ta-dā yo-gam-avāps-ya-si \|\| 2-53\|\| |

| | |
|---|---|
| ॐ तत्सत् | om tat-sat |
| इति श्रीमद्भगवद्गीतासु | iti śrīmad-bhaga-vad-gī-tā-su |
| उपनिषत्सु | upa-ni-ṣat-su |
| ब्रह्मविद्यायां | brahma-vid-yā-yāṁ |
| योगशास्त्रे | yoga-śās-tre |
| श्रीकृष्णार्जुनसंवादे | śrī-kṛṣ-ṇār-juna-saṁ-vā-de |
| साङ्ख्य योगो नाम | sāṅ-khya yo-go nā-ma |
| द्वितीयोऽध्यायः । | dvi-tī-yo'dhyā-yaḥ I |
| ॐ हरिःॐ | om hariḥ om |
| श्री गुरुभ्यो नमः | śrī guru-bhyo namaḥ |
| हरिः ॐ | hariḥ om |

| | |
|---|---|
| सर्वधर्मान्परित्यज्य | sar-va-dhar-mān-pari-tyaj-ya |
| मामेकं शरणं व्रज । | mām-ekaṁ śara-ṇaṁ vra-ja I |
| अहं त्वा सर्वपापेभ्यः | ahaṁ tvā sar-va-pā-pebh-yaḥ |
| मोक्ष्ययिष्यामि मा शुचः ॥ १८-६६ ॥ | mokṣ-ya-yiṣ-yā-mi mā śu-caḥ I I 18-66 I I |

